श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री प्रह्लादेन कृतं

# ॥ श्रीनृसिंहकवचम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीनृसिंहकवचम् ॥

नृसिंहकवचं वक्ष्ये प्रह्लादेनोदितं पुरा।
सर्वरक्षाकरं पुण्यं सर्वोपद्रवनाशनम्॥ १ ॥

सर्व संपत्करञ्चैव स्वर्गमोक्ष प्रदायकम्।
ध्यात्वा नृसिंहं देवेशं हेमसिंहासनस्थितम्॥ २ ॥

विवृतास्यं त्रिनयनं शरदिन्दुसमप्रभम्।
लक्ष्म्यालिङ्गितवामाङ्गं विभूतिभिरुपाश्रितम्॥ ३ ॥

चतुर्भुजं कोमळाङ्गं स्वर्णकुण्डलशोभितम्।
सरोज शोभितोरस्कं रत्नकेयूरमुद्रितम्॥ ४ ॥

तप्तकाञ्चनसङ्काशं पीतनिर्मलवाससम्।
इन्द्रादिसुरमौलिस्थ स्फुरन्माणिक्यदीप्तिभिः॥ ५ ॥

विराजितपदद्वन्द्वं शङ्खचक्रादिहेतिभिः।
गरुत्मता च विनयात् स्तूयमानं मुदान्वितम्॥ ६ ॥

स्वहृत्कमलसंवासं कृत्वा तु कवचं पठेत्।
नृसिंहो मे शिरः पातु लोकरक्षात्मसंभवः॥ ७ ॥

सर्वगोऽपि स्तंभवासः फालं मे रक्षतु ध्वनिम्।
नृसिंहो मे दृशौ पातु सोमसूर्याग्निलोचनः॥ ८ ॥

स्मृतिं मे पातु नृहरिः मुनिवर्यस्तुतिप्रियः।
नासां मे सिंहनासस्तु मुखं लक्ष्मीमुखप्रियः॥ ९ ॥

सर्वविद्याधिपः पातु नृसिंहो रसनां मम।
वक्त्रं पात्विन्दुवदनः सदा प्रह्लादवन्दितः॥ १० ॥

नृसिंहः पातु मे कण्ठं स्कन्धौ भूभरणान्तकृत्।
दिव्यास्त्रशोभितभुजः नृसिंहः पातु मे भुजौ॥ ११ ॥

करौ मे देववरदो नृसिंहः पातु सर्वतः।
हृदयं योगिसाध्यश्च निवासं पातु मे हरिः॥ १२ ॥

मध्यं पातु हिरण्याक्षवक्षःकुक्षिविदारणः।
नाभिं मे पातु नृहरिः स्वनाभि ब्रह्मसंस्तुतः॥ १३ ॥

ब्रह्माण्डकोटयः कट्यां यस्यासौ पातु मे कटिम्।
गुह्यं मे पातु गुह्यानां मन्त्राणां गुह्यरूपधृक्॥ १४ ॥

ऊरू मनोभवः पातु जानुनी नररूपधृत्।
जङ्घे पातु धराभारहर्ता योऽसौ नृकेसरी॥ १५ ॥

सुरराज्यप्रदः पातु पादौ मे नृहरीश्वरः।
सहस्रशीर्षापुरुषः पातु मे सर्वशस्तनुम्॥ १६ ॥

महोग्रः पूर्वतः पातु महावीराग्रजोऽग्नितः।
महाविष्णुर्दक्षिणे तु महाज्वालस्तु नैर्ऋतौ॥ १७ ॥

पश्चिमे पातु सर्वेशो दिशि मे सर्वतोमुखः।
नृसिंहः पातु वायव्यां सौम्यां भूषणविग्रहः॥ १८ ॥

ईशान्यां पातु भद्रो मे सर्वमङ्गळदायकः।
संसारभयतः पातु मृत्योर्मृत्युर्नृकेसरी॥ १९ ॥

इदं नृसिंहकवचं प्रह्लादमुखमण्डितम्।
भक्तिमान् यः पठेन्नित्यं सर्वपापैः प्रमुच्यते॥ २० ॥

पुत्रवान् धनवान् लोके दीर्घायुरुपजायते।
यं यं कामयते कामं तं तं प्राप्नोत्यसंशयम्॥ २१ ॥

www.prapatti.com

सर्वत्र जयमाप्नोति सर्वत्र विजयी भवेत्।
भूम्यन्तरिक्षदिव्यानां ग्रहाणां विनिवारणम्॥ २२॥

वृश्चिकोरगसंभूत विषापहरणं परम्।
ब्रह्मराक्षसयक्षाणां दूरोत्सारणकारणम्॥ २३॥

भूर्जे वा ताळपात्रे वा कवचं लिखितं शुभम्।
करमूले धृतं येन सिध्येयुः कर्मसिद्धयः॥ २४॥

देवासुरमनुष्येषु स्वं स्वमेव जयं लभेत्।
एकसन्ध्यं त्रिसन्ध्यं वा यः पठेन्नियतो नरः॥ २५॥

सर्वमङ्गळमाङ्गळ्यं भुक्तिं मुक्तिञ्च विन्दति।
द्वात्रिंशतिसहस्राणि पठेत् शुद्धात्मनां नृणाम्॥ २६॥

कवचस्यास्य मन्त्रस्य मन्त्रसिद्धिः प्रजायते।
अनेन मन्त्रराजेन कृत्वा भस्माभि मन्त्रणम्॥ २७॥

तिलकं विन्यसेद्यस्तु तस्य ग्रहभयं हरेत्।
त्रिवारं जपमानस्तु दत्तं वार्यभिमन्त्र्य च॥ २८॥

प्राशयेद्यो नरो मन्त्रं नृसिंहध्यानमाचरन्।
तस्य रोगाः प्रणश्यन्ति ये च स्युः कुक्षिसंभवाः॥ २९॥

किमत्र बहुनोक्तेन नृसिंहसदृशो भवेत्।
मनसा चिन्तितं यत्तु स तच्चाप्नोत्यसंशयम्॥ ३०॥

गर्जन्तं गर्जयन्तं निजभुजपटलं स्फोटयन्तं हठन्तं
रूप्यन्तं तापयन्तं दिवि भुवि दितिजं क्षेपयन्तं क्षिपन्तम्।
क्रन्दन्तं रोषयन्तं दिशि दिशि सततं संहरन्तं भरन्तं
वीक्षन्तं घूर्णयन्तं करनिकरशतैर्दिव्यसिंहं नमामि॥ ३१॥

॥ इति श्रीनृसिंहकवचं समाप्तम्॥